**प्रधानमन्त्री-बिहार**

प्रधानमन्त्री नरेन्द्रमोदी अद्य बिहार-पश्चिमबङ्गराज्ययोः भ्रमणं करिष्यति। बिहार-राज्यस्य मोतिहारी-नगरे प्रधानमन्त्री द्विशताधिक सप्त सहस्रकोटिरूप्यकाणां बहुविधविकासपरियोजनानां शिलान्यासं, उद्घाटनं, राष्ट्राय समर्पणं च करिष्यति। पश्चिमबङ्गालराज्ये अपि प्रधानमन्त्री पञ्च सहस्रकोटिरूप्यकाणां बहुविधविकासपरियोजनानां शिलान्यासं, उद्घाटनं, राष्ट्राय समर्पणं च करिष्यति।

**केन्द्रीय-स्वास्थ्य**

केन्द्रीय-स्वास्थ्य-एवं परिवार-कल्याण मन्त्री जगत-प्रकाश नड्डा प्रत्यपादयत् यत्, स्वस्थभारतस्य कृते निवारकं, प्रोत्साहकं, रोगनिवारकं च स्वास्थ्य-परिचर्या प्रदातुं प्रशासनं समग्र-दृष्टिकोणेन कार्यं करोति । नवदेहल्यां एकस्मिन् कार्यक्रमे जनसभां सम्बोधयन् श्री. नड्डाः अवदत् यत् प्रशासनेन एक दशमलव सप्त सप्तति: लक्षं यावत् आयुष्मान्-आरोग्यमन्दिराणि निर्मितानि, यानि स्वास्थ्यसंस्थया सह कस्यापि व्यक्तेः प्रथमः सम्पर्कः अस्ति। अवधेयं यत् एतानि आयुष्मान-आरोग्यमन्दिराणि न केवलं नगरेषु कार्यं कुर्वन्ति अपितु देशस्य दूरस्थेषु क्षेत्रेषु अपि विस्तृतानि सन्ति।

**दक्षिणकोरिया-देशस्य**

दक्षिणकोरिया-देशस्य विशेषदूतानां प्रतिनिधिदलं ह्यः नवदेहल्यां प्रधानमन्त्रिणा नरेन्द्रमोदिना साकम् अमिलत् । प्रधानमन्त्री मोदी भारत-दक्षिणकोरिया देशयोः विशेष-सामरिकसहभागित्वस्य प्रगतिविषये भारतस्य प्रतिबद्धतां पुनः सुदृढीकृतवान्। सः गतमासे दक्षिणकोरिया-देशस्य राष्ट्रपतिना ली जे मयुङ्ग् इत्यनेन सह अमेलीत् । प्रधानमन्त्री मोदी अवोचत् यत् लोकतन्त्रानां मध्ये निकटसहयोगः भारत-प्रशान्तप्रदेशे शान्तिं, स्थिरतां, समृद्धिं च जनयति।

**उत्तरप्रदेशस्य-ए. टी. एस्**

उत्तरप्रदेशस्य ए. टी. एस्. इति भयोत्पादन-विरोधी-दलम् आध्यात्मिक-नेता छङ्गूर् बाबा इत्यस्य प्रमुखसहयोगिनं रशीद् इत्येनं बृहत्-परिमाणे धर्मान्तरणस्य अवैध कार्ये राकेट् इत्यस्मिन् कथित-भूमिकायाः कारणात् अगृह्णात् । बलरामपुरस्य उत्रौला-क्षेत्रात् एतत् निगडनं अभवत्। तत्रैव अवैध कार्यस्य राकेट् इत्यस्य उत्पत्तिः अभवत् इति सम्भाव्यते। छङ्गूर् बाबा, यस्य वास्तविकं नाम जमालुद्दीन् अस्ति, सः अन्तरराज्यीय अवैध कार्यस्य सूत्रधारः अस्ति।

**ऋतुविज्ञानविभागः**

भारतीय-ऋतु-विज्ञान-विभागेन अद्य जम्मू कश्मीर हिमाचल प्रदेशः, उत्तराखण्ड, उत्तरप्रदेशस्य च केषुचित् भागेषु प्रचण्डवृष्टेः सञ्चेतना प्रसारितास्ति। पंजाब, हरियाणा, राजस्थाने च श्वः प्रचंड वृष्टिः भविष्यति। आगामिदिनत्रयाणां कृते केरल-माहे-दक्षिण-कर्नाटकान्तरिक-क्षेत्रेणां कृते ऑरेंज अलर्ट इति संचेतना प्रासारिता अस्ति। आन्ध्रप्रदेशस्य, केरलस्य, लक्षद्वीपस्य च एकान्तस्थानेषु प्रचण्डवायोः संभावना विद्यते। केरलराज्ये कासरगोड्, कन्नूर्, वायनाड्, कोझिकोड इत्यादीनां जनपदानां कृते ऑरेंजअलर्ट इति नारङ्गवर्णीया सञ्चेतना, अन्येषां मण्डलानां च कृते येलो-अलर्ट इति पीतवर्णीया सञ्चेतनापि निर्गतास्ति ।

**।। इति वार्ता:।।**